ता ऊचुः प्रणयाद्देवं प्रजापतिमकल्मषम् ।
अवकाशन्तु नो देहि देवदेव प्रजापते ! ॥
यत्र तिष्ठामहे सर्व्वा भर्त्तृभिः सहिताः सुखम् ।
पतयश्च महाभाग ! देहि नोऽव्यक्तसम्भव ! ॥
ब्रह्मोवाच ।
ब्रह्माण्डमेतत् सुश्रोण्यः शतकोटिप्रविस्तरम् ।
तस्यान्ते स्वेच्छया तुष्टा उष्यतां मा विलम्बथ ॥
भर्त्तृंश्च वः प्रयच्छामि दृष्ट्वा रूपस्विनोऽनघाः ।
यद्यद्वं गम्यतां देशो यस्या यो रोचतेऽधुना ॥
एवमुक्तास्तु ताः सर्व्वा यथेष्टं प्रययुस्तदा ।
ब्रह्मा ससर्ज्ज तूर्णं तान् लोकपालान् महा-
बलान् ॥
दृष्ट्वा तु लोकपालांस्तु ताः कन्याः पुनराह्वयन् ।
विवाहं कारयामास ब्रह्मा लोकपितामहः ॥
एकामिन्द्राय स प्रादादग्नयेऽन्यां यमाय च ।
निर्ऋताय च देवाय वरुणाय महात्मने ॥
वायवे धनदेशाय ईशानाय च सुव्रत ! ।
ऊर्द्ध्वं स्वयमधिष्ठाय शेषायाधोव्यवस्थिताम् ॥
एवं दत्त्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशां पुनः ।
दशमीं भर्त्तृनाम्नस्तु अहर्नाम्नोदनः प्रभुः ॥
ततःप्रभृति ताः देव्यः सेन्द्राद्याः परि-
कीर्त्तिताः ॥"
इति वराहपुराणम् ॥*॥

न्यायमते अस्याः सर्व्वगतत्वम् । परममहत्त्व-परिमाणम् । दूरान्तिकादिधीहेतुत्वम् । नित्यत्वम् । एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यपदेशभाक्त्वम् । अस्या गुणाः । संख्या १ परिमितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ । इति भाषापरिच्छेदः ॥ (सामान्यम् । यथा, सुश्रुते । १ । ४३ ।
"वमनद्रव्ययोगानां दिगियं सम्प्रकीर्त्तिता ॥")

दिकः, पुं, (दिशि कायते शब्दायते इति । कै+कः ।) करभः । इति शब्दरत्नावली ॥

दिक्करः, पुं, (दिशं आदेशं करोति उत्साहान्वितत्वात् । कृ+टः ।) युवा । इति मायटीकाधृतकोषः ॥ (महादेवः । यथा, कालिकापुराणे । ८२ अध्याये ।
"दिक्करस्तरुणः प्रोक्तस्तथा शम्भुश्च दिक्करः ॥")

दिक्करवासिनी, स्त्री, (दिक्करे शम्भौ वसतीति । वस+णिनिः+ङीप् ।) देवीविशेषः । यथा,
"एवं दिक्करवासिन्याः कथितः पूर्व्ववत् क्रमः ।
यं श्रुत्वा नाशुभं किञ्चिदाप्नोति श्रवणे रतः ॥
दिक्करस्तरुणः प्रोक्तस्तथा शम्भुश्च दिक्करः ।
तस्मिन्नध्युषिता देवी तस्माद्दिक्करवासिनी ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करिका, स्त्री, (दिक्करिणो दिग्गजस्य सकाशात् कायते शोभते इति । दिक्करिन्+कै+कः । ततष्टाप् ।) नदीविशेषः । यथा,—
"अस्ति ताटकशैले तु सरो मानससन्निभम् ।
यत्र सार्द्धं शैलपुत्र्या जलक्रीड़ां सदा हरः ॥
कुरुते नरशार्द्दूल ! स्वर्णपङ्कजशोभिते ।
तस्य पश्चान्मध्यपूर्व्वभागेभ्यश्च सरित्त्रयम् ॥
अवतीर्णं प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ॥
दिग्गजवीर्य्यसंजाता तेन दिक्करिका स्मृता ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करी, स्त्री, (दिक्कर+ङीष् ।) युवती । इति हेमचन्द्रः । ३ । १७५ ॥

दिक्पतिः, पुं, (दिशां पतिः ।) दिगधीश्वरः । तद्यथा । प्राच्यधिपो रविः । अग्निकोणाधिपः शुक्रः । दक्षिणाधिपः कुजः । नैर्ऋतकोणाधिपो राहुः । प्रतीच्यधिपः शनिः । वायुकोणाधिपश्चन्द्रः । उत्तराधिपो बुधः । ईशानकोणाधिपो गुरुः । तस्य प्रमाणं यथा,—
"सूर्य्यः शुक्रः क्षमापुत्त्रः सैंहिकेयः शनिः शशी ।
सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः ॥"
इति ज्योतिस्तत्त्वम् ॥

दिक्पालः, पुं, (दिशः पालयतीति । दिश्+पालि+अण् ।) पूर्व्वादिदशदिशां पालकः । यथा,— पूर्व्वस्यां दिशि इन्द्रः । अग्निकोणे वह्निः । दक्षिणस्यां दिशि यमः । नैर्ऋतकोणे निर्ऋतः । पश्चिमस्यां दिशि वरुणः । वायुकोणे मरुत् । उत्तरस्यां दिशि कुवेरः । ईशानकोणे ईशः । ऊर्द्ध्वदिशि ब्रह्मा । अधोदिशि अनन्तः । इति पुराणम् ॥ यथा, पद्मपुराणे ।
"यत्नार्च्चयन्ति विधिना दिक्पालादींस्तु कर्म्मिणः ।
तत्र प्रपूजयेद्देवं विधिं भागवतं शुकम् ॥"

दिक्शूलं, क्ली, (दिशि शूलमिव ।) दिग्विशेषगमने निषिद्धवाराः । यथा,—
पश्चिमायां शुक्ररवी । उत्तरस्यां बुधमङ्गलौ ।
पूर्व्वस्यां शनिसोमौ । दक्षिणस्यां वृहस्पतिः ।
तथा च ।
"शुक्रादित्यदिने न वारुणदिशं न ज्ञे कुजे चोत्तरां
मन्देन्दोश्च दिने न शक्रककुभं याम्यां गुरौ न
व्रजेत् ।
शूलानीति विलङ्घ्य यान्ति मनुजा ये वित्त-
लाभाशया
भ्रष्टाशाः पुनरापतन्ति यदि ते शक्रेण तुल्या
अपि ॥"
इति ज्योतिःसारसंग्रहः ॥
केषाञ्चिन्मते ।
"——————शौरे गुरौ दक्षिणाम् ।
ईशाने ज्वलने चैव नैर्ऋते मारुते तथा ।
न गन्तव्यं सुराचार्य्ये प्रतीच्यां रविशुक्रयोः ॥"
इति सुखबोधः ॥

दिगम्बरः, पुं, (दिगेव अम्बरं वस्त्रं यस्य । उलङ्गत्वात् तथात्वम् ।) शिवः । क्षपणः । (स तु जैनविशेषः । यथा, पञ्चदश्याम् । ६ । ८२ ।
"दिगम्बरा मध्यमत्वमाहुरापादमस्तकम् ।
चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ॥")
तमः । इति मेदिनी । रे, २६७ ॥ (नग्ने, त्रि । यथा, पञ्चतन्त्रे । ५ । १४ ।
"एकाकी गृहसन्त्यक्तः पाणिपात्रो दिगम्बरः ।
सोऽपि संवाह्यते लोके तृष्णया पश्य कौतुकम् ॥")

दिगम्बरी, स्त्री, (दिगम्बर+ङीष् ।) दुर्गा । दिगम्बरस्य पत्नी । इति कुलार्णवः ॥ नग्ने, त्रि । इत्यमरः । ३ । १ । ३९ ॥ (यथा, कालीध्याने ।
"महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ॥")

दिग्गजः, पुं, (दिशो गजः ।) दिग्हस्ती । यथा,—
"ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः ॥"
इत्यमरः । १ । ३ । ४ ॥
एते क्रमेण पूर्व्वाद्यष्टदिशां हस्तिनः ॥

दिग्धः, पुं, (दिह्यते लिप्यते स विषादिना इति । दिह+क्तः ।) विषाक्तवाणः । तत्पर्य्यायः । लिप्तकः २ । इत्यमरः । २ । ८ । ८८ ॥ (यथा, रामायणे । २ । ३० । २३ ।
"सा विद्धा बहुभिर्वाणै र्दिग्धैरिव गजाङ्गना ॥")
स्नेहः । अग्निः । इति हेमचन्द्रः ॥ प्रबन्धः । इत्यजयपालः ॥

दिग्धः, त्रि, (दिह+क्तः ।) लिप्तः । इति मेदिनी । धे, ७ ॥ (यथा, भट्टिः । ३ । २१ ।
"सचन्दनोशीरमृणालदिग्धः
शोकाग्निनागाद्द्युनिवासभूयम् ॥")

दिग्वासाः, [स्] पुं, (दिगेव वासो वस्त्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११२ ॥ (यथा, महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासाः काम एव च ॥")
नग्ने, त्रि ॥ (यथा, मनुः । ११ । २०२ ।
"स्नात्वानुविप्रो दिग्वासाः प्राणायामेन शुध्यति ॥")

दिग्विजयः, पुं, (दिशां दिक्स्थितलोकानां विजयः ।) विद्यया युद्धेन वा दिशां विजयः । यथा शङ्करदिग्विजयः पाण्डवदिग्विजय इत्यादि ॥

दिङ्कः, पुं, (स्फोटनकाले दिङ् इति शब्दं कायति शब्दायते इति । कै+कः ।) उत्कुणडिम्भः । इति शब्दार्थकल्पतरुः ॥

दितं, त्रि, (दीयते स्मेति । दो अवखण्डने+क्तः "द्यतिस्यतीति ।" ७ । ४ । ४० । इति इत्वम् ।) छिन्नम् । इत्यमरः । ३ । १ । १०३ ॥

दितिः, स्त्री, दैत्यमाता । सा दक्षकन्या (यथा, महाभारते । १ । ६५ । १२ ।
"अदितिर्दितिर्दनुः काला दनायुः सिंहिका
तथा ॥")
इयं कश्यपपत्नी च । (दो+भावे क्तिन् ।) खण्डनम् । इति मेदिनी । ते, २४ ॥ राजविशेषे, पुं । इति शब्दार्थकल्पतरुः ॥ (दातरि, त्रि । यथा, ऋग्वेदे । ४ । २ । ११ ।
"राये च नः स्वपत्याय देव दितिं च रास्वा-
दितिमुरुष्य ॥"
"दितिं दातारं च रास्व देहि ।" इति तद्भाष्ये सायनः ॥)

दितिजः, पुं, (दितेर्जायते इति । दिति+जन+डः ।) दैत्यः । इति हेमचन्द्रः । २ । १५२ ॥ (यथा, महाभारते । १ । २३१ । १७ ।
"कृतस्य कर्त्ता दितिजान्तकस्त्वं
जेता रिपूणां प्रवरः सुराणाम् ॥")